ग्रहणी
ग्रहणी

खादेद्वह्निमितं प्रहन्तिगदवांस्तक्रस्य विल्वेन च ॥”
इति लघुलाईचूर्णम् ॥ * ॥
“त्रिकटु त्रिफला चैव विड़ङ्गं जीरकद्वयम् ।
भल्लातकं यमानी च हिङ्गु लवणपञ्चकम् ॥
गृहधूमवचाकुष्ठं रसगन्धकमभ्रकम् ।
क्षारत्रयाजमोदा च चित्रकं गजपिप्पली ॥
मुस्ता मोचरसं पाठा लवङ्गं जातिपत्रकम् ।
समभागकृतश्चैषां चूर्णं श्लक्ष्णं विनिर्म्मितम् ॥
शक्राशनस्य चूर्णन्तु चूर्णतुल्यं प्रदापयेत् ॥
मन्दाग्निकासदुर्नामशोथपाण्डरुचिज्वरान् ।
विष्टम्भं संग्रहं शूलं हन्यान्नानातिसारजित् ॥
आमवातापहं बल्यं सूतिकादोषनाशनम् ।
वर्ज्जनीयं माषमम्लं स्नानं पिशितभोजनम् ॥
पथ्यं काञ्जिकमत्रापि दधि तक्रमथापि वा ।
हृहल्लाईचूर्णमिदं लाईभावितमुत्तमम् ॥”
इति हृहल्लाईचूर्णम् ॥ * ॥
“जातीफललवङ्गैलापत्रत्वङ्नागकेशरैः ।
कर्पूरचन्दनतिलत्वक्क्षीरीतगरामलैः ॥
तालीसपिप्पलीपथ्यास्थूलजीरकचित्रकैः ।
शुण्ठीविड़ङ्गमरिचैः समभागविचूर्णितैः ॥
यावन्त्येतानि सर्व्वाणि दद्याद्भङ्गां च तावतीम् ।
सर्व्वचूर्णसमानांशा प्रदेया शुभ्रशर्करा ॥
कर्षमात्रमिदं खादेन्मधुनाप्लावितं जनः ।
नाशयेत् ग्रहणीं कासं क्षयं श्वासमरोचकम् ॥”
इति जातीफलादिचूर्णम् ॥ * ॥
“चित्रकं पिप्पलीमूलं क्षारौ लवणपञ्चकम् ।
व्योषं हिङ्ग्वजमोदाञ्च चव्यं चैकत्र चूर्णयेत् ॥
वटिका मातुलुङ्गस्य रसैर्व्वा दाड़िमस्य वा ।
कृता विपाचयत्यामं प्रदीपयति चानलम् ॥”
क्षारौ स्वर्ज्जिका यवक्षारश्च । लवणपञ्चकमिति सैन्धवं रुचकं चैव विड़ं सामुद्रिकं गड़मिति । व्योषं शुण्ठीपिप्पलीमरिचानि । अजमोदात्र यवानिका । मातुलुङ्गं बीजपूरकम् । इति चित्रकादिवटिका ॥ * ॥ [सगुड़ः ।
“श्रीफलशलाटुः कल्को नागरचूर्णेन मिश्रितः
ग्रहणीगदमत्युग्रं तक्रभुजा शीलितो जयति ॥”
श्रीफलशलाटुः विल्वस्यामं फलम् । गुड़स्याच भागद्वयम् । इति विल्वकल्कः ॥ * ॥
“चतुष्पलं सुधाकाण्डं त्रिपलं लवणत्रयम् ।
वार्त्ताकोः कुड़वञ्चार्कमूलाद्विल्वे तथानलात् ॥
दग्ध्वा द्रवेण वार्त्ताकोर्गुटिका भोजनोत्तरम् ।
भुक्ता भुक्तं पचत्याशु नाशयेद्ग्रहणीगदम् ॥
कासं श्वासं तथार्शांसि विसूचीञ्च हृदामयम् ॥”
इति वार्त्ताकुगुटिका ॥ * ॥
“मुस्तकातिविषाविल्वकौटजं सूक्ष्मचूर्णितम् ।
मधुना च समालीढ़ं ग्रहणीं सर्व्वजां जयेत् ॥”
कौटजं इन्द्रयवः । इति मुस्तकादिचूर्णम् ॥ * ॥
“श्वेतो वा यदि वा रक्तः सुपक्को ग्रहणीगदः ।
गुड़ेनाधिकसर्ज्जेन भक्षितेनाशु नश्यति ॥”
सर्ज्जः राल इति लोके । इति सर्ज्जरसचूर्णम् ॥ * ॥
“विल्वाम्बुशक्रयववालकमोचसिद्ध-
माजं पयः पिबति यो दिवसत्रयेण ।
सोऽतिप्रवृद्धचिरजग्रहणीविकारं
सामं सशोणितमसाध्यमपि क्षिणोति ॥”
मोचो मोचरसः । क्षिणोति हन्ति ।
“प्रस्थत्रये त्वामलकीरसस्य
शुद्धस्य दत्त्वार्द्धतुलां गुड़स्य ।
चूर्णीकृतैर्ग्रन्थिकजीरचव्य-
व्योषेभकृष्णाहपुषाजमोदैः ॥
विड़ङ्गसिन्धुत्रिफलायवानी-
पाठाग्निधान्यैश्च पलप्रमाणैः ।
दत्त्वा त्रिवृच्चूर्णपलानि चाष्टा-
वष्टौ च तैलस्य पचेद्यथावत् ॥
तं भक्षयेदक्षफलप्रमाणं
यथेष्टचेष्टस्त्रिसुगन्धियुक्तम् ।
अनेन सर्व्वे ग्रहणीविकाराः
सश्वासकासस्वरभेदशोथाः ॥
शाम्यन्ति चायं चिरमन्तरग्ने-
र्हतस्य पुंस्त्वस्य च वृद्धिहेतुः ।
स्त्रीणान्तु वन्ध्यामयनाशनः स्यात्
कल्याणको नाम गुड़ः प्रसिद्धः ॥
तैले मनाक् त्रिवृद्भृष्टा त्रिसुगन्धि पलं पलम् ।
सिद्धे निधेयमत्रैव गुड़े कल्याणपूर्व्वके ॥”
इति कल्याणगुड़ः ॥ * ॥
“पिप्पली पिप्पलीमूलं चित्रकं गजपिप्पली ।
त्रिफला चाजमोदा च नलिनी जीरकस्तथा ।
सैन्धवं रौमकञ्चापि सामुद्रं रुचकं विड़म् ॥
आरग्वधश्च त्वक्पत्रं सूक्ष्मैला चोपकुञ्चिका ।
शुण्ठीशक्रयवाश्चैव प्रत्येकं कर्षसम्मिताः ॥
मृद्वीकायाः पलान्यत्र चत्वारि कथितानि हि ।
त्रिवृतायाः पलान्यष्टौ गुड़स्यार्द्धतुला तथा ॥
तिलतैलपलान्यष्टावामलक्या रसस्य तु ।
प्रस्थत्रयमिदं सर्व्वं शनैर्मृद्वग्निना पचेत् ॥
औड़म्बरं चामलकं वादरं वा यथाफलम् ।
तावन्मात्रमिदं खादेद्भक्षयेद् वा यथानलम् ॥
निखिलान् ग्रहणीरोगान् प्रमेहांश्चैव विंशतिम् ।
उरोघातं प्रतिश्यायं दौर्ब्बल्यं वह्निसंक्षयम् ॥
ज्वरानपि हरेत् सर्व्वान् कुर्य्यात् कान्तिं मतिं स्वरम् ।
पिचुपाठान्वयाद्धन्ति रक्तपित्तञ्च विग्रहम् ॥
धातुक्षीणो वयःक्षीणः स्त्रीषु क्षीणः क्षयी च यः ।
तेभ्यो हितश्च वन्ध्यायै महाकल्याणको गुड़ः ॥”
इति महाकल्याणकगुड़ः ॥ * ॥
“कुष्माण्डानां सुपक्वानां खिन्नानां निष्कुलत्वचाम् ।
सर्पिः प्रस्थे पलशतं ताम्रपात्रे शनैः पचेत् ॥
पिप्पली पिप्पलीमूलं चित्रकं गजपिप्पली ।
धान्यकानि विड़ङ्गानि नागरं मरिचानि च ॥
त्रिफला चाजमोदा च कलिङ्गाजाजिसैन्धवम् ।
एकैकस्य पलं चैकं त्रिवृतोऽष्टौ पलानि च ॥
तैलस्य च पलान्यष्टौ गुड़ात् पञ्चाशदेव तु ।
आमलक्या रसस्याथ प्रस्थत्रयमुदीरितम् ॥
तावत् पाकं प्रकुर्व्वीत मृदुना वह्निना भिषक् ।
यावत् दर्व्वीप्रलेपः स्यात्तदैनमवतारयेत् ॥
औडुम्बरं चामलकं वादरं वा यथाफलम् ।
तावन्मात्रमिदं खादेद्भक्षयेद्वा यथानलम् ॥
अनेनैव विधानेन प्रयुक्तश्च दिने दिने ।
निहन्ति ग्रहणीरोगान् कुष्ठान्यर्शोभगन्दरान् ॥
ज्वरमानाहहृद्रोगगुल्मोदरविसूचिकाः ।
कामलां पाण्डुरोगञ्च प्रमेहांश्चैव विंशतिम् ॥
वातशोणितवीसर्पदद्रुचर्म्मदलीमकान् ।
वातपित्तकफान् सर्व्वान् द्वन्द्वान् शुद्धान् समाचरेत् ॥
व्याधिक्षीणा वयःक्षीणाः स्त्रीषु क्षीणाश्च ये नराः ।
तेभ्यो हितो गुड़ोऽयं स्यात् वन्ध्यानामपि पुत्त्रदः ॥
वृष्यो बल्यो वृंहणश्च वयसः स्थापनः परः ॥”
इति कुष्माण्डकल्याणकगुड़ः ॥ * ॥
अतीसाराधिकारलिखितं विल्वतैलं चात्र हितम् । इति ग्रहणीरोगाधिकारः । इति भावप्रकाशः ॥ (सनिदानलक्षणादिकं चिकित्सितञ्चास्य यथा,—
“सामं साम्नमजीर्णेऽन्ने जीर्णे पक्वन्तु नैव वा ।
अकस्माद्वा मुहुर्बद्धमकस्माच्छिथिलं मुहुः ॥
चिरकृद्ग्रहणीदोषः सञ्ज्ञयाचोपवेशयेत् ।
स चतुर्धा पृथग् दोषैः सन्निपाताच्च जायते ॥
प्राग्रूपं तस्य सदनं चिरात् पचनमम्लकः ।
प्रसेको वक्त्रवैरस्यमरुचिस्तृट्क्लमो भ्रमः ॥
आनद्धोदरता च्छर्दिः कर्णक्ष्वेड़ोऽन्त्रकूजनम् ।
सामान्यं लक्षणं कार्श्यं धूमकस्तमको ज्वरः ॥
मूर्च्छा शिरोरुग्विष्टम्भः श्वयथुः करपादयोः ।
तत्रानिलात्तालुशोषस्तिमिरं कर्णयोः स्वनः ॥
पार्श्वोरुवङ्क्षणग्रीवारुजाभीक्ष्णं विसूचिका ।
रसेषु गृद्धिः सर्व्वेषु क्षुत्तृष्णा परिकर्त्तिका ॥
जीर्णे जीर्य्यति चाध्मानं भुक्ते स्वास्थ्यं समश्नुते ।
वातहृद्रोगगुल्मार्शःप्लीहपाण्डुत्वशङ्कितः ॥
चिराद्दुःखं द्रवं शुष्कं तन्वामं शब्दफेनवत् ।
पुनः पुनः सृजेद्वर्च्चः पायुरुक् श्वासकासवान् ॥
पित्तेन नीलं पीताभं पीताभः सृजति द्रवम् ।
पूत्यम्लोद्गारहृत्कण्ठदाहारुचितृड़र्दितः ॥
श्लेष्मणा पच्यते दुःखमन्नं छर्द्दिररोचकः ।
आस्योपदेहनिष्ठीवकासहृल्लासपीनसाः ॥
हृदयं मन्यते स्त्यानमुदरं स्तिमितं गुरु ।
उद्गारो दुष्टमधुरः सदनं स्त्रीष्वहर्षणम् ॥
भिन्नामश्लेष्मसंसृष्टगुरुवर्चःप्रवर्त्तनम् ।
अकृशस्यापि दौर्ब्बल्यं सर्व्वजे सर्व्वसङ्करः ॥
विभागेऽङ्गस्य ये चोक्ता विषमाद्यास्त्रयोऽग्नयः ।
तेऽपि स्युर्ग्रहणीदोषाः समस्तु स्वास्थ्यकारणम् ॥
वातव्याध्यश्मरीकुष्ठमेहोदरभगन्दराः ।
अर्शांसि ग्रहणीत्यष्टौ महारोगाः सुदुस्तराः ॥”
इति वाभटे निदानस्थानेऽष्टमेऽध्याये ॥
चिकित्सास्या यथा,—
“ग्रहणीमाश्रितं दोषमजीर्णवदुपाचरेत् ।
अतीसारोक्तविधिना तस्यामञ्च विपाचयेत् ॥
अन्नकाले यवाग्वादिपञ्चकोलादिभिर्युतम् ।
वितरेत् भट्टचणं पुनर्योगांश्च दीपनान् ॥